# Shri Hayagriva Stotram

# શ્રીહયગ્રીવસ્તોત્રમ્

## Document Information

Text title : hayagrIvastotram 2

File name : hayagrIvastotram.itx

Category : vishhnu, stotra, vedAnta-deshika, vishnu

Location : doc_vishhnu

Author : Vedanta Desika

Transliterated by : Sundar Rajan RD sundar.rajanrd at gmail.com,Srivatsan HS sriphy at gmail.com

Proofread by : Sundar Rajan RD, NA, Nivedita R

Latest update : August 29, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 27, 2024

*sanskritdocuments.org*

# શ્રીહયગ્રીવસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
શ્રીમાન્ વેઙ્કટનાથાર્યઃ કવિતાર્કિકકેસરી ।
વેદાન્તાચાર્યવર્યો મે સન્નિધત્તાં સદા હૃદિ ॥

જ્ઞાનાનન્દમયં દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૧॥

સ્વતઃ સિદ્ધં શુદ્ધસ્ફટિકમણિભૂભૃત્પ્રતિભટં
સુધાસધ્રીચીભિર્દ્યુતિભિરવદાતત્રિભુવનમ્ ।
અનન્તૈસ્ત્રય્યન્તૈરનુવિહિતહેષાહલહલં
હતાશેષાવદ્યં હયવદનમીડેમહિ મહઃ ॥ ૨॥

સમાહારઃ સામ્નાં પ્રતિપદમૃચાં ધામ યજુષાં
લયઃ પ્રત્યૂહાનાં લહરિવિતતિર્બોધજલધેઃ ।
કથાદર્પક્ષુભ્યત્કથકકુલકોલાહલભવં
હરત્વન્તર્ધ્વાન્તં હયવદનહેષાહલહલઃ ॥ ૩॥

પ્રાચી સન્ધ્યા કાચિદન્તર્નિશાયાઃ પ્રજ્ઞાદૃષ્ટેરઞ્જનશ્રીરપૂર્વા ।
વક્ત્રી વેદાન્ભાતુ મે વાજિવક્ત્રા વાગીશાખ્યા વાસુદેવસ્ય મૂર્તિઃ ॥ ૪॥

વિશુદ્ધવિજ્ઞાનઘનસ્વરૂપં વિજ્ઞાનવિશ્રાણનબદ્ધદીક્ષમ્ ।
દયાનિધિં દેહભૃતાં શરણ્યં દેવં હયગ્રીવમહં પ્રપદ્યે ॥ ૫॥

અપૌરુષેયૈરપિ વાક્પ્રપઞ્ચૈરદ્યાપિ તે ભૂતિમદૃષ્ટપારામ્ ।
સ્તુવન્નહં મુગ્ધ ઇતિ ત્વયૈવ કારુણ્યતો નાથ કટાક્ષણીયઃ ॥ ૬॥

દાક્ષિણ્યરમ્યા ગિરિશસ્ય મૂર્તિર્દેવી સરોજાસનધર્મપત્ની ।
વ્યાસાદયોઽપિ વ્યપદેશ્યવાચઃ સ્ફુરન્તિ સર્વે તવ શક્તિલેશૈઃ ॥ ૭॥

મન્દોઽભવિષ્યન્નિયતં વિરિઞ્ચો વાચાં નિધે વઞ્ચિતભાગધેયઃ ।
દૈત્યાપનીતાન્દયયૈવ ભૂયોઽપ્યધ્યાપયિષ્યો નિગમાન્ન ચેત્ત્વમ્ ॥ ૮॥

વિતર્કડોલાં વ્યવધૂય સત્ત્વે બૃહસ્પતિં વર્તયસે યતસ્ત્વમ્ ।
તેનૈવ દેવ ત્રિદશેશ્વરાણામસ્પૃષ્ટદોલાયિતમાધિરાજ્યમ્ ॥ ૯॥

અગ્નૌ સમિદ્ધાર્ચિષિ સપ્તતન્તોરાતસ્થિવાન્મન્ત્રમયં શરીરમ્ ।
અખણ્ડસારૈર્હવિષાં પ્રદાનૈરાપ્યાયનં વ્યોમસદાં વિધત્સે ॥ ૧૦॥

યન્મૂલમીદૃક્પ્રતિભાતિ તત્ત્વં યા મૂલમામ્નાયમહાદ્રુમાણામ્ ।
તત્ત્વેન જાનન્તિ વિશુદ્ધસત્ત્વાસ્તામક્ષરામક્ષરમાતૃકાં તે ॥ ૧૧॥

અવ્યાકૃતાદ્વ્યાકૃતવાનસિ ત્વં નામાનિ રૂપાણિ ચ યાનિ પૂર્વમ્ ।
શંસન્તિ તેષાં ચરમાં પ્રતિષ્ઠાં વાગીશ્વર ત્વાં ત્વદુપજ્ઞવાચઃ ॥ ૧૨॥

મુગ્ધેન્દુનિષ્યન્દવિલોભનીયાં મૂર્તિં તવાનન્દસુધાપ્રસૂતિમ્ ।
વિપશ્ચિતશ્ચેતસિ ભાવયન્તે વેલામુદારામિવ દુગ્ધસિન્ધોઃ ॥ ૧૩॥

મનોગતં પશ્યતિ યઃ સદા ત્વાં મનીષિણાં માનસરાજહંસમ્ ।
સ્વયં પુરોભાવવિવાદભાજઃ કિઙ્કુર્વતે તસ્ય ગિરો યથાર્હમ્ ॥ ૧૪॥

અપિ ક્ષણાર્ધં કલયન્તિ યે ત્વામાપ્લાવયન્તં વિશદૈર્મયૂખૈઃ ।
વાચાં પ્રવાહૈરનિવારિતૈસ્તે મન્દાકિનીં મન્દયિતું ક્ષમન્તે ॥ ૧૫॥

સ્વામિન્ભવદ્ધ્યાનસુધાભિષેકાત્વહન્તિ ધન્યાઃ પુલકાનુબન્ધમ્ ।
અલક્ષિતે ક્વાપિ નિરૂઢમૂલમઙ્ગેષ્વિવાનન્દથુમઙ્કુરન્તમ્ ॥ ૧૬॥

સ્વામિન્પ્રતીચા હૃદયેન ધન્યાસ્ત્વદ્ધ્યાનચન્દ્રોદયવર્ધમાનમ્ ।
અમાન્તમાનન્દપયોધિમન્તઃ પયોભિરક્ષ્ણાં પરિવાહયન્તિ ॥ ૧૭॥

સ્વૈરાનુભાવાસ્ત્વદધીનભાવાઃ સમૃદ્ધવીર્યાસ્ત્વદનુગ્રહેણ ।
વિપશ્ચિતો નાથ તરન્તિ માયાં વૈહારિકીં મોહનપિઞ્છિકાં તે ॥ ૧૮॥

પ્રાઙ્નિર્મિતાનાં તપસાં વિપાકાઃ પ્રત્યગ્રનિઃશ્રેયસસમ્પદો મે ।
સમેધિષીરંસ્તવ પાદપદ્મે સઙ્કલ્પચિન્તામણયઃ પ્રણામાઃ ॥ ૧૯॥

વિલુપ્તમૂર્ધન્યલિપિક્રમાણાં સુરેન્દ્રચૂડાપદલાલિતાનામ્ ।
ત્વદઙ્ઘ્રિરાજીવરજઃકણાનાં ભૂયાન્ પ્રસાદો મયિ નાથ ભૂયાત્ ॥ ૨૦॥

પરિસ્ફુરન્નૂપુરચિત્રભાનુપ્રકાશનિર્ધૂતતમોનુષઙ્ગામ્ ।
પદદ્વયીં તે પરિચિન્મહેઽન્તઃ પ્રબોધરાજીવવિભાતસન્ધ્યામ્ ॥ ૨૧॥

ત્વત્કિઙ્કરાલઙ્કરણોચિતાનાં ત્વયૈવ કલ્પાન્તરપાલિતાનામ્ ।

મઞ્જુપ્રણાદં મણિનૂપુરં તે મઞ્જૂષિકાં વેદગિરાં પ્રતીમઃ ॥ ૨૨॥

સઞ્ચિન્તયામિ પ્રતિભાદશાસ્થાન્સન્ધુક્ષયન્તં સમયપ્રદીપાન્ ।
વિજ્ઞાનકલ્પદ્રુમપલ્લવાભં વ્યાખ્યાનમુદ્રામધુરં કરં તે ॥ ૨૩॥

ચિત્તે કરોમિ સ્ફુરિતાક્ષમાલં સવ્યેતરં નાથ કરં ત્વદીયમ્ ।
જ્ઞાનામૃતોદઞ્ચનલમ્પટાનાં લીલાઘટીયન્ત્રમિવાશ્રિતાનામ્ ॥ ૨૪॥

પ્રબોધસિન્ધોરરુણૈઃ પ્રકાશૈઃ પ્રવાલસઙ્ઘાતમિવોદ્વહન્તમ્ ।
વિભાવયે દેવ સપુસ્તકં તે વામં કરં દક્ષિણમાશ્રિતાનામ્ ॥ ૨૫॥

તમાંસિ ભિત્ત્વા વિશદૈર્મયૂખૈઃ સમ્પ્રીણયન્તં વિદુષશ્ચકોરાન્ ।
નિશામયે ત્વાં નવપુણ્ડરીકે શરદ્ઘને ચન્દ્રમિવ સ્ફુરન્તમ્ ॥ ૨૬॥

દિશન્તુ મે દેવ સદા ત્વદીયાઃ દયાતરઙ્ગાનુચરાઃ કટાક્ષાઃ ।
શ્રોત્રેષુ પુંસામમૃતં ક્ષરન્તીં સરસ્વતીં સંશ્રિત કામધેનુમ્ ॥ ૨૭॥

વિશેષવિત્પારિષદેષુ નાથ વિદગ્ધગોષ્ઠીસમરાઙ્ગણેષુ ।
જિગીષતો મે કવિતાર્કિકેન્દ્રાન્ જિહ્વાગ્રસિંહાસનમભ્યુપેયાઃ ॥ ૨૮॥

ત્વાં ચિન્તયંસ્ત્વન્મયતાં પ્રપન્નસ્ત્વામુદ્ગૃણન્ શબ્દમયેન ધામ્ના ।
સ્વામિન્સમાજેષુ સમેધિષીય સ્વચ્છન્દવાદાહવબદ્ધશૂરઃ ॥ ૨૯॥

નાનાવિધાનામગતિઃ કલાનાં ન ચાપિ તીર્થેષુ કૃતાવતારઃ ।
ધ્રુવં તવાનાથપરિગ્રહાયાઃ નવં નવં પાત્રમહં દયાયાઃ ॥ ૩૦॥

અકમ્પનીયાન્યપનીતિભેદૈરલઙ્કૃષીરન્ હૃદયં મદીયમ્ ।
શઙ્કાકલઙ્કાપગમોજ્જ્વલાનિ તત્ત્વાનિ સમ્યઞ્ચિ તવ પ્રસાદાત્ ॥ ૩૧॥

વ્યાખ્યામુદ્રાં કરસરસિજૈઃ પુસ્તકં શઙ્ખચક્રે
બિભ્રદ્ભિન્નસ્ફટિકરુચિરે પુણ્ડરીકે નિષણ્ણઃ ।
અમ્લાનશ્રીરમૃતવિશદૈરંશુભિઃ પ્લાવયન્ માં
આવિર્ભૂયાદનઘમહિમા માનસે વાગધીશઃ ॥ ૩૨॥

વાગર્થસિદ્ધિહેતોઃ પઠત હયગ્રીવસંસ્તુતિં ભક્ત્યા ।
કવિતાર્કિકકેસરિણા વેઙ્કટનાથેન વિરચિતામેતામ્ ॥ ૩૩॥

॥ ઇતિ શ્રીહયગ્રીવસ્તોત્રં સમાપ્તમ્ ॥

કવિતાર્કિકસિંહાય કલ્યાણગુણશાલિને ।
શ્રીમતે વેઙ્કટેશાય વેદાન્તગુરવે નમઃ ॥

The initial verses differ from the Hayagriva
stotra vyAkhyA/commentary posted separately.

Encoded by Sundar Rajan RD

Alternatively, encoded by Srivatsan H

Proofread by Sundar Rajan RD, Nivedita R

---

*Shri Hayagriva Stotram*

pdf was typeset on April 27, 2024

Please send corrections to *sanskrit@cheerful.com*